# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – याज्ञवल्क्यस्मृतिः व्यवहाराध्यायः (१-२५ प्रकरणानि)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः।
राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः॥

२ प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते॥

३ न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥

४ देशान्तरस्य दुर्लेख्ये नष्टोन्मृष्टे हृते तथा।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत्॥

**प्रश्नः २** कृतेऽपराधे सभासदां को दण्डः दाप्यः ? लिखत।

**प्रश्नः ३** आततायिलक्षणं विलिख्य तस्य कृते कः दण्डः दाप्यः ? इति स्पष्टयत।

**प्रश्नः ४** जनकपितुः सम्पत्तौ के पुत्राः अधिकारिणः भवन्ति ? विषयमिमं सविस्तृतं निदर्शयत।

**प्रश्नः ५** सीमाविवादं प्रस्थाप्य योग्यनिर्णयं कुर्वन्तु।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ धर्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्यचिन्तकाः।
कर्तव्यं वचनं तेषां समूहहितवादिनाम्॥

२ करपाददतो भङ्गे छेदने कर्णनासयोः।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा॥

३ अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम् ।
सनाणकपरीक्षी तु दाप्य उत्तमसाहसम् ॥
४ अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च सदाप्यो दशमुत्तमम् ॥

**प्रश्नः ७** पैतामहे द्रव्ये पौत्राणां विभागे दायनिर्णयं स्पष्टयत ।

**प्रश्नः ८** राज्ञा कर्मचारिभ्यो कया रीत्या वेदननिर्धारणं कर्तव्यम् ? वर्णयत ।

**प्रश्नः ९** स्त्री-कन्यादूषणे मिथ्याभिशंसने को दण्डः ? यथाग्रन्थं वर्णयत ।

**प्रश्नः १०** व्यवहाराध्यायस्य मुख्यवर्ण्यविषयान् विनिर्दिशत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ?
२ व्यवहाराध्याये कति प्रकरणानि सन्ति ?
३ राज्ञः मुख्यकर्तव्यं किम् ?
४ हीनः कतिविधः दर्शितः ?
५ स्मृतिशब्दस्य कोऽर्थः अस्ति ?
६ राजव्यवहारः नृपेण कैः सार्धं मिलित्वा दृष्टव्यः ?
७ वादे कति विधानि प्रमाणानि सन्ति ?
८ आधिशब्दस्य कोऽर्थः अस्ति ?
९ उपनिधिः उपक्षेपः अनयोः शब्दयोः कः मुख्यार्थः अस्ति ?
१० व्यवहाराध्याये प्रथमप्रकरणस्य नाम किमस्ति ?
११ व्यवहाराध्याये अन्तिमप्रकरणस्य नाम किमस्ति ?
१२ धर्मशब्दस्य कोऽर्थः अस्ति ?
१३ पुरुषार्थाः कति सन्ति ?
१४ आश्रमाः कति सन्ति ?
१५ संस्काराः कति सन्ति ?

****